No. 238. A Commentary on Durgasinhavritti, by SARVADHARA [दुर्गसिंहवृत्तिटीका वाङ्मयप्रदीपनाम्नी—सर्वधरोपाध्यायः].

Begins:

ओं नमो जिनाय ।

प्रणम्य शिरसा सर्वं सर्वज्ञं जगतां गुरुम् ।
त्याद्यन्तप्राक्रियां वक्ष्ये सविशेषां समासतः ॥ १ ॥

त्यादयः स्यामहिपर्यन्ता वर्त्तमानादयोऽर्था आभिर्विभज्यते इत्यन्वर्थबलाद्विभक्तय उच्यन्ते । तत्र वर्त्तमाना । ति तस् अन्ति, सि थस् थ, मि वस् मस् ॥ ते आते अन्ते, से आथे ध्वे, ए वहे महे ॥

इत्युपाध्यायसर्वधरविरचितायां त्याद्यन्तप्रक्रियायां उविकरणापवादः ॥

इत्युपाध्यायसर्वधरविरचितायां वर्त्तमाना समाप्ता प० १३ ॥

इति वाङ्मयप्रदीपे पण्डितसर्वधरकृते परोक्षा समाप्ता प० ॥ ३९ ॥

Ends:

इति दौर्गसिंह्यां वृत्तौ तद्धितप्रकरणं लिखितं धर्मचन्द्रपाठकेन ॥

No. 239. Durgasinhavritti with Dhundhaka [दौर्गसिंहीवृत्तिः—ढुण्ढकसहिता].

Text begins:

सिद्धो वर्णसमाम्नायः । सिद्धः खलु वर्णानां समाम्नायो वेदितव्यः न पुनरन्यथोपदेष्टव्य इत्यर्थः । सिद्धशब्दोऽत्र नित्यार्थो निष्पन्नार्थः प्रसिद्धार्थो वा । यथा सिद्धमाकाशं सिद्धमन्नम् । काम्पील्य सिद्धो देवदत्त इति ।

Commentary begins:

सिद्धो वर्णसमाम्नायः । षिधूशास्त्रमाङ्गल्ययोः ।

Ends:

एवमन्येऽप्यनुसर्त्तव्याः ।

इति दौर्गसिंह्यां वृत्तौ तद्धितप्रकरणं समाप्तम् ॥ पं० देवसागरगणिनालेखि ॥

Commentary:

द्वारादीनां च । पदाद्योरपि । वृद्धिः ॥

इति दौर्गसिंह्यां वृत्तौ तद्धितप्रकरणढुण्ढकम् ॥ संवत् १४६७ वर्षे - - - - १० तिथौ चंद्रे अनुराधानक्षत्रे चंद्रगच्छे तपाभट्टारकश्रीपूर्णचंद्रसूरिपट्टे श्रीहेमहंससूरिभिः श्री - - - - - - वृत्तिचतुष्कढुण्ढकं लिखित्वा पूर्णीकृतं देवमूर्त्तिगणिभणनार्थं चिरं नन्दतु ॥

No. 264. Advaitasiddhi, by MADHUSUDANA, with a commentary by SADASUKHA [अद्वैतसिद्धेः प्रथमपरिच्छेदः—सटीकः मू. मधुसूदनः टीका नाम सारचन्द्रिका टी. सदासुखः].

Commentary begins:

श्रीवंशीधरमिश्राणां गुरूणां चरणस्मृतिः ।
भूयान्मे साधिकेष्टानामनिष्टानां च बाधिका ॥ १ ॥
अद्वैतसिद्धिव्याख्यानं सदासुखेन धीमता ।
संक्षिप्तचन्द्रिकार्थेन क्रियते सारचन्द्रिका ॥ २ ॥

Text begins:

मायाकल्पितमातृतामुखमृषाद्वैतं प्रपञ्चाश्रयः ।

Text ends:

मम श्रुतिशतार्पिता तदहमस्मि पूर्णो हरिः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीविश्वेश्वरसरस्वतीश्रीचरणाशिष्यश्रीमधुसूदनसरस्वतीविरचितायामद्वैतसिद्धौ सपरिकरप्रपञ्चमिथ्यात्वनिरूपणं नाम प्रथमः परिच्छेदः समाप्तः ॥ ॥

Commentary ends :

परिच्छेदस्याग्रिमस्य तमोघ्नी सारचन्द्रिका ।
शंभवे चित्प्रकाशाय दीपत्वेन मयाऽर्पिता ॥

इति श्रीमद्वदान्यशिरोमणेः श्रीमणीरामवर्मणो मनसादेव्यां लब्धजन्मना श्रीमन्निमलाब्धीखचेतरामादधिगतनिर्मलस्वरूपेण श्रीमत्पण्डितजनावतंसश्रीवंशीधरमिश्रादधीतवेदान्तशास्त्रेण श्रीसदासुखधीमता लघुचन्द्रिकाया अद्वैतसिद्धिटीकाया उद्धृतायां सारचन्द्रिकायां प्रथमः परिच्छेदः समाप्तः ॥ १ ॥

No. 277. Tattvapradipikatika, by PRATYAKSVARUPA—the second parichchheda [तत्त्वप्रदीपिका टीका—टी. नयनप्रसादिनी—प्रत्यक्स्वरूपः]

Begins :

ओं नमः श्रीशान्तिनाथाय यस्य क्रमनखांशवः ।
मौलौ दधति नम्राणां मङ्गलामक्षतश्रियम् ॥ १ ॥

एतेन कारणेन निष्क्रियस्य जीवस्य कथमीश्वरप्रेर्यत्वमित्यपि प्रत्युक्तम् ।

Ends :

द्वित्वादिर्जातिमानं द्व्यणुकपरिमितिपाकजप्रक्रियाद्यो ?
हेतुत्वं कालकाष्ठे जनिमदष्टभिदा भेदवादो निरस्तः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यप्रत्यक्प्रकाशपूज्यपादशिष्यस्य प्रत्यक्स्वरूपभगवतः कृतौ तत्त्वप्रदीपिकायां टीकायां नयनप्रसादिन्यां द्वितीयः परिच्छेदः ॥

द्वितीयेऽस्मिन् परिच्छेदे ग्रन्थसंख्या निगद्यते ।
- - - सहस्राणां षट् शतं च ततोऽधिकम् ॥ ३६०० ॥

शुभं भवतु लेखकपाठकयोः ॥

श्रीतपागच्छे पूज्य पं० जिनविजयगणिशिष्य पं. विवेकविजयगणिभिः श्रीचिकोशे एषा प्रतिर्मुक्ता श्रीज्ञानभक्त्या ॥

No. 308. Sampradayanirupanam, by ANANTADEVA [संप्रदाय-निरूपणम्— आपदेवसूनुः अनन्तदेवः].

Begins:

श्रीगणेशायनमः । श्रीमद्गोपालाय नमः ।

सर्ववेदान्तसिद्धान्तसंप्रदायानुसारतः ।
नमस्कृत्य गुरून् वक्ष्ये प्रक्रियां- - - - - ॥ १ ॥
यच्छ्रीमद्रामतीर्थेभ्यः संप्रदायसमागतम् ॥
श्रुतं सत्तर्कसचिवं विविच्य तदिहोच्यते ॥ २ ॥

अखण्डमद्वितीयमानन्दैकरसं स्वप्रकाशं चैतन्यमेव जगतस्तत्वम् ॥

Ends:

धर्मावधीनां करुणानिधीनां श्रीमद्गुरूणां चरणावलंबात् ।
यत्संप्रदायश्रुतिमप्रहाय निरूपितं तुष्यतु तेन विष्णुः ॥ १ ॥
इत्येषा वाङ्मयी पूजा श्रीमद्गोपालपादयोः ।
अर्पिता तेन मे देवः प्रीयतां परमेश्वरः ॥

इति श्रीमदापदेवसूनुना अनन्तदेवेन कृतं संप्रदायनिरूपणं समाप्तम् ॥

॥ शुभमस्तु ॥

No. 309. Siddhantatattvam, by ANANTA [सिद्धान्ततत्वम्—आपदेवसूनु-अनन्तदेवः].

Begins:

सर्वशास्त्रार्थमर्यादापरीक्षणविचक्षणान् ।
वन्दे श्रीतातचरणान् श्रीकान्तचरणाश्रयान् ॥
श्रीरामतीर्थचरणस्मरणप्रसादतः ।
प्रस्थानत्रयसिद्धान्तसंप्रदायः प्रदर्श्यते ॥ १ ॥
सिद्धान्ततत्वव्याख्यानव्याजेन विशदीकृतम् ।
वेदान्तसंप्रदायार्थं गृह्णन्तु ज्ञानकामिनः ॥ २ ॥
सम्यङ्निरूपितमिदं यदि नाद्रियन्ते
दुष्टा निकृष्टमतयो हृदि मत्सरेण ।

किंतावता ज्वरवतामरुचेर्न जातु
दुग्धस्य शुद्धमधुरस्य विदूषणं स्यात् ॥ ३ ॥

चिकीर्षितं प्रतिजानीते सर्ववेदान्तेति ।

Ends:

इत्थं प - - - - - - पादश्रीरामतीर्थानुसृतिप्रसादात् ।
सिद्धान्ततत्वं गतवाग्विवादमनन्तदेवेन - - - - - ॥
इत्येषा वाङ्मयी पूजा श्रीमद्गोपालपादयोः ।
अर्पिता तेन मे देवः प्रीयतां परमेश्वरः ॥

इति श्रीसकल - - विश्रान्तयशोमण्डलनिखिलश्रुतिशिरस्तत्वपरिशीलन-मर्यादाधुरंधरश्रीमदापदेवसूनुना अनन्तेन कृतं - - - - मप्रकरणं समाप्तम् ॥

No. 324. Anandalaharibhashyam, by MUKUTARAYA [आनन्दलहरीभाष्यम्—मुकुटरायः].

Begins:

श्रीभगवत्यै नमः ।

शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुं
नचेदेवं देवो न खलु कुशलस्यन्दितुमपि ।
अतस्त्वामाराध्यं हरिहरविरिञ्चयादिभिरपि
प्रणेतुं स्तोतुं वागयमकृतपुण्यः प्रभवति ॥ १ ॥

Ends:

हे भगवति वाचां जननि यत्तव स्तवनं मया कृतं मम वाक् न भवति त्वमेव समस्तजिन्हाग्रेषु वाग्रूपिणी । अत एव त्वदीयाभिः तव स्तुतिरेषा तेजोराशेः सूर्यस्य नीराजनम् । तथा समुद्रदेवतायाः सौहित्यजननं तर्पण-द्वारा तृप्तिः तृप्यमाना ममैषा स्तुतिः ॥

इति श्रीपदवाक्यप्रमाणअतिरात्रयाजीमहाभाष्यभट्टारकारविन्दलोचना-चार्यपुत्रश्रीरामकाविडिण्डिममुगुटरायमहापाकृतौ सौन्दर्यलहरीभाष्यलोचने

द्वितीयमुन्मीलनं संपूर्णम् । श्रीसौन्दर्यलहरीस्तोत्रटीका संपूर्णा । श्रीरस्तु ॥ शुभं भवतु ॥

No. 326. Kamasara, by KAMADEVA [कामसारः—कामदेवः].

Begins:

रतिपरिमलसिन्धुः कामिनीकेलिबन्धु-
र्विदितभवनमोदः सेव्यमानप्रमोदः ।
जयति मकरकेतुर्मोहनस्यैकहेतु-
र्विरचितवह [बहु] सेवः कामिनीकामदेवः ॥ १ ॥

पद्मिनी चित्रिणी चैव संखनी हस्तिनी तथा ।
शशो मृगो वृषोऽश्वश्च स्त्रीपुंसोर्जातिरीरिता ॥ २ ॥

Ends:

एतान्बन्धान् परिज्ञाय मुखमासादयेत्पराम् ।
नारीणां दर्पसंघातं बन्धं कुर्यात्प्रियंवदः ॥ ४१ ॥

इति श्रीकामदेवविरचिते कामसारे आसनबन्धनानिरूपणं संपूर्णम् ॥

No. 327. Kavyakalpalatavritti, by S'UBHAVIJAYAGANI [काव्यकल्पलतावृत्तिमकरन्दः—शुभविजयगणिः].

Ends:

पुण्यनरदृष्टचन्द्रा एते सहस्रामिता इत्यादि ॥

इति श्रीतपागच्छाधिनायकपातिसाहिश्रीअकब्बरप्रतिबोधदायकश्रीशत्रुंजयादितीर्थकरमुक्तिकारकभट्टारकश्रीहीरविजयसूरीश्वरशिष्यपण्डितश्रीशुभाविजयगणिविरचिते काव्यकल्पलतावृत्तिमकरन्देऽर्थसिद्धिप्रतानप्राप्तसंख्यासूचकोद्योतकः षष्ठः प्रसरः । - - -

स्वस्ति श्रीमत्तपागच्छस्वर्गिगच्छनवाम्बुदाः ।
अनेकसत्त्वसम्यक्त्वप्रतिलम्भैकलग्नकाः ॥ १ ॥

देशनातिशयाद्बोधीकृतश्रीमदकब्बराः ।
षाण्मासिकामार्यकरमोचनादिविधायकाः ॥ २ ॥
अभूवन् भुवनोद्भासियशसः प्रशमाब्धयः ।
श्रीहीरविजयाह्वानसूरयो गुणभूरयः ॥ ३ ॥
तत्पट्टकमलारामविभासनविभाकराः ।
दिल्लीपतिसभाबाप्तवादिवादजयप्रथाः ॥ ४ ॥
औदार्यधैर्यगाम्भीर्याद्यनेकगुणभूमयः ।
श्रीमद्विजयसेनाख्यसूरयः सन्ति संप्रति ॥ ५ ॥
तत्पट्टहाटकक्ष्माभृद्भूमिकल्पद्रुमोपमाः ।
यौवराज्यपदप्रष्ठाः प्रहृष्टवदनाम्बुजाः ॥ ६ ॥
श्रीमद्विजयदेवाह्वसूरयः सुरसूरयः ।
इव प्रज्ञाप्रकर्षेण जयंति जगतीतले ॥ ७ ॥
एषां श्रीसूरीणां प्रसादमासाद्य विगतदोषाणाम् ।
श्रीमत्सलेमसाहि राज्ये शुभविजयमेधावी ॥ ८ ॥
श्रीहीरविजयसूरीश्वरचरणाम्भोजसेवनप्रवणः ।
रसरसरसशशलक्ष्मप्रमिते श्रीविक्रमाद्वर्षे ॥ ९ ॥
श्रीकाव्यकल्पलतिकावृत्तिमकरंदनामधेयेन ।
श्रीविजयदेवसूरीश्वरनिर्देशादहमकार्षम् ॥ १० ॥
श्रीमन्तो वाचकश्रेष्ठाः कल्याणविजयाभिधाः ।
जयंति जगतां पूज्याः सुधर्मस्वामिसंनिभाः ॥ ११ ॥
तत्पादपद्मरोलम्बसंनिभैर्वाचकोत्तमैः ।
श्रीधर्मविजयाह्वानैः शोधिता नन्दताच्चिरम् ॥ १२ ॥
ततश्च पण्डितोत्तंसमेरुविजयकोविदाः ।
तच्छिष्यैः शोधिता प्राज्ञलावण्यविजयाभिधैः ॥ १३ ॥
यत्किंचिद्भवति क्षूणं राभस्यादिवशादिह ।
प्रेक्ष्या चक्षुष्मतां मुख्यैः शोध्यं तदुपकारिभिः ॥ १४ ॥

पुष्पदन्ताविमौ यावदुदयेते नभस्तले ।
वृत्तिस्तावदियं जीयाद्वाच्यमाना विशारदैः ॥ १६ ॥

इति श्रीतपागच्छाधिनायकपातसाहिश्रीअकब्बरप्रतिबोधदायकतत्प्रदत्त-जगद्गुरुबिरुदधारकषण्मासादवधिसकलजन्तुजाताभयदानदायकश्रीशत्रुंजय-रैवतकाचलकरमुक्तिकारकभट्टारकश्रीश्रीहीरविजयसूरीश्वरचरणसेविपण्डित-श्रीशुभविजयगणिना श्रीहीरविजयसूरीश्वरपट्टोदयाद्रिशिरःशेखरायमाणसंप्रति-विजयमानश्रीविजयसेनसूरीश्वरपट्टविभूषणगतदूषणाचार्यश्रीविजयदेवसूरीश्वर-निर्देशाद्विरचिते काव्यकल्पलतावृत्तिमकरन्देऽर्थसिद्धिप्रतानप्राप्तसमस्यास्तब-कोद्योतकः सप्तसरः समाप्तः तत्समाप्तौ च समाप्तोऽर्थसिद्धिप्रतानस्तत्समाप्तौ च समाप्ताश्चत्वारः प्रतानास्तत्समाप्तौ च समाप्तोऽयं काव्यकल्पलतावृत्तिमक-रन्दनामा ग्रन्थः ॥

संवत् बाणतर्कदर्शनविधुमित १६६९ वर्षे चातुर्मासिकमासीनानूचा-नपरंपरापौलोमीप्राणनाथसनाथश्रीविजयदेवसूरीश्वरचलननालिनरजःपुञ्जपुण्यी-कृते श्रीराजनगरे आश्विनसितषष्ठ्यां दिवस्पतिदिवसे मूलनक्षत्रे मूलाका सिद्धियोगे दैवसिकसौभाग्यनाम्नि योगे इति भद्रम् ॥ इति काव्यकल्पल-तिकावृत्तिमकरन्दनाम्नी संपूर्णा ॥ ग्रंथाग्रम् । ३१९६ ॥

No. 354. Ramasatakam, by SOMESVARA, with a Commentary [रामशतकं सटीकम्—मू. सोमेश्वरः—टी०].

Commentary begins:

रामचन्द्रं प्रणम्यादौ सानुजं जानकीपतिम् ।
रामशतस्य व्याख्येयं क्रियते बालबोधिनी ॥ १ ॥

Text begins:

उद्धर्त्तासौ धरित्रीभरमिति भुजगाधीश्वरो वंशवृद्धिः ।

Text ends:

विश्वंभरामण्डलमण्डनस्य श्रीरामभद्रस्य यशःप्रशस्तिम् ।

चकार सोमेश्वरदेवनामा यामार्द्धनिष्पन्नमहाप्रबन्धः ॥ १०१ ॥

इति रामशतकं संपूर्णम् ॥

Commentary ends:

विश्वंभरामण्डलमण्डनस्य भूमण्डलाभरणस्य ॥ १०१ ॥

इति श्रीरामशतककाव्यविवरणं संपूर्णम् ॥

No. 362. Sringarakallola, by RAYABHATTA [शृङ्गारकल्लोलः—रायभट्टः]

Begins:

अनुनयति गिरीशे द्राक्परावर्तिताङ्ग्याः
स्फटिकभवनभित्तौ तन्मुखेन्दुं समीक्ष्य ।
पुनरभिवलिताया विस्मयस्मेरमुग्ध्याः
जयति गिरिसुतायाः कोपि दृष्टिप्रसादः ॥ १ ॥

Ends:

गुम्फो वाचां मसृणमधुरो मालतीनामिव स्या-
दर्थो वाच्यः प्रसरणपरः सम्मितः सौरभस्य ।
भावव्यङ्ग्यो रस इव रसस्तद्दिवाह्लादहेतु-
र्मालेवासौ सुकविरचना कस्य भूषां न धत्ते ॥ १०४ ॥

इति श्रीमहाकविपण्डितश्रीमद्रायभट्टकृतं शृङ्गारकल्लोलं नाम काव्यं संपूर्णम् ॥ ॥ संवत् १६५८ वर्षे श्रावणशुदि ९ भौमे लिखितम् ॥ ॥

No. 356. Lavanyalahari, by KESAVABHATTA [लावण्यलहरी—केशवभट्टः].

Begins:

मुकुन्दब्रह्मेन्द्रप्रभृतिकवयो यत्र चकिताः
क्व तत्रार्वाचीनः प्रभवति भवत्याः स्तुतिविधौ ।
तथाप्यस्मिन्नर्थे वितरसि मतिं मादृशि जने
न जाने पुण्यानां मम जननि केषां विलसितम् ॥ १ ॥

Ends:

श्रीलौगाक्षिकुलारविन्दतरणिर्माध्यन्दिनाम्नायवि-
न्मीमांसायुगतर्कतन्त्रचतुरः साहित्यरत्नाकरः ।
दुर्गायाः स्तुतिमाततान सुकृती गोदातटे प्रोल्लस-
त्पुण्यस्तंभनिवासिकेशवसुतानन्तात्मजः केशवः ॥ १३० ॥

इति श्रीमत्सकलपण्डितशिरोमणिभट्टकेशवसुतानन्तभट्टसुतकेशवभट्ट-रचिता लावण्यलहरी ॥

संवत् १७०७ वर्षे शाके १५७३ प्रवर्त्तमाने अद्येह श्रीआश्विनमासे शुद्धपक्षेऽष्टम्यां तिथौ रविवासरे अ० गदाधरसुतजयरामेण लिखितोऽयं ग्रन्थः ॥

No. 370. Alankaratilaka, by BHANUDATTA [अलंकारतिलकः—भानुदत्तः].

Begins:

सोऽयं मे मुदमादधातु भगवान् कोलावतारो हरिः
सिन्धोः क्लेशमपास्य यस्य दशनप्रान्ते स्थिताया भुवः ।
तारा हारति वारिदस्तिलकति स्वर्वाहिनी माल्यति
क्रीडा दर्पणति क्षपापतिरहर्देवश्च तार्टंकति ॥ १ ॥
उरस्फुरदलंकारचमत्कारपटुश्रियः ।
तनोति तिलकं भाले भारत्या भानुसत्कविः ॥ २ ॥

अपूर्णम्

No. 371. Kavyadarpana [काव्यदर्पणम्].

Begins:

श्रीगणेशाय नमः ।

कामदं नीलशैलस्थं करुणावरुणालयम् ।
शरणं सर्वसत्वानां श्यामलं धाम कामये ॥ १ ॥
माननीयं मुनीन्द्राणां मतमालोक्यमुत्तमम् ।
कवीनां कौतुकं कर्तुं क्रियते काव्यदर्पणः ॥ २ ॥

अत्रोदाहरणं सर्वं श्रीकृष्णचरणाङ्कितम् ।
यद्वर्णनं तदप्युक्तं काव्ये कृष्णविनोदने ।
धर्मार्थकाममोक्षाणां प्राप्तिर्भवति काव्यतः ॥ ३ ॥

अतो हेतोर्यथाबुद्धि तत्स्वरूपं निरूप्यते ।
गुणाभिव्यञ्जकैर्वर्णैर्युतावस्फुटदूषणौ ॥ ४ ॥

शब्दार्थौ क्वाप्यलंकाररहितौ काव्यमस्यतु ।
आत्माध्वनिः परं वाच्यापेक्षयाह्लाददायिनि ॥

Ends:

कृतकाव्यपरीक्षेयं कवीनां कौतुकावहा ।
आर्या (विगतमात्सर्याः) सानुकंपं विचार्यताम् ॥

इति श्रीकाव्यदर्पणे दोषनिर्णयः सप्तमः परिच्छेदः समाप्तिमगात् ॥

संवत् १८२२ शके १६८८ प्रवर्त्तमाने मासोत्तमे मासे ज्येष्ठमासे धवल-पक्षे नवम्यां चन्द्रवासरे लिखितमिदं पुस्तकम् । अटग्रामे मोढज्ञातिभ० मीठासुतजगदीशेन लिखितम् ॥

No. 373. Kavyadarsatika, by HARINATHA [काव्यादर्शस्यटीका-मार्जनम्—विश्वधरात्मजहरिनाथमहोपाध्यायः].

Begins:

श्रीगणेशायनमः ॥ श्रीगुरुभ्योनमः ॥

गिरीशहृतदेहार्द्धां गिरीशत्वसमृद्धये ।
गिरिशरीरे बिभ्राणां गिरीशतनयां नुमः ॥ १ ॥

किञ्चिच्चेलाञ्चलविगलनोदञ्चले राधिकायाः
सव्रीडायाः सपदि पिहिते वक्षसंक्षिप्तमात्रः ।
पायादस्मानभिनवसुधाक्षालितो नन्दसूनो-
र्वाल्योद्वेलत्कुवलयवनीकोमलो दृष्टिपातः ॥ २ ॥

साम्ना सुवर्णदानेन भेदाद्विगृहीतोऽपि वा ।
उद्धृतोऽपि कठरोपि मया दण्डी साद्यते ॥ ३ ॥

तातं विश्वधरं नत्वा ज्यायांसं केशवं गुरुम् ।
भानोरवरजेनायं प्रक्रमः क्रियते मया ॥ ४ ॥
दुर्बोधपदसंधाननिकाममलिनात्मनः ।
क्रियते हरिनाथेन काव्यादर्शस्य मार्जनम् ॥ ५ ॥
विशिष्टशिष्टाचारानुमितकर्त्तव्यताकं समुचितेष्टदेवतास्मरणम् ॥

Ends:

कविपण्डितमूर्द्धन्यश्रीविश्वधरजन्मनः ।
कृतौ श्रीहरिनाथस्य परिच्छेदस्तृतीयकः ॥
द्रोहेण वा स्नेहवशेन वापि स्वभावतः सज्जनदुर्जनाभ्याम् ।
दोषाय वा तस्य निराक्रियायै कृतिर्मदीया परिभावनीया ॥

श्रीराधावल्लभो जयति । इति महामहोपाध्यायविश्वधरात्मजमहामहोपाध्यायश्रीकेशवानुजमहोपाध्यायश्रीहरिनाथकृतौ काव्यादर्शमार्जने तृतीयः परिच्छेदः । श्रीराधावल्लभसहायोऽस्ति ।

संवत् १७४६ वर्षे वैशाखद्वितीयवदि १३० सोमे लिखितं भ० गङ्गारामेण यादृशम् ।

No. 375. Mugdhamedhakara, by RATNAMANDANAGANI [मुग्धमेधाकरः—रत्नमण्डनगणिः].

Begins:

वर्ण्ये वर्णादिभिस्तुल्यं वस्तु वीक्ष्योपमादिभिः ।
औचित्यैकादितद्धर्मानादायार्थं सुधीः सृजेत् ॥ १ ॥
उपमारूपकोत्प्रेक्षापह्नुतिभ्रान्तिसंशयाः ।
स्मृत्याक्षेपव्यतिरेकाः सामान्योन्मीलिते च ते ॥ २ ॥
उपमानेन सादृश्यमुपमेयस्य यत्र सा ।
प्रत्ययाव्ययतुल्यार्थसमासैरुपमा यथा ॥ ३ ॥
वक्त्रं वर्द्धितरागसागरतया राकामृगाङ्कायते
धत्तः शोणिमबन्धुरत्वमधरौ बन्धूकपुष्पे इव ।

उत्तुङ्गौ बिभृतः कुचाविभविभोः कुम्भद्वयीविभ्रमं
यस्यास्तां विरलोऽरविन्दनयनां हातुं विभुर्वल्लभाम् ॥ ४ ॥

Ends:

शंकुः कन्दरमञ्जरीमदमहद्वीचीन्द्रमित्यादिक-
श्लाघार्थध्वनिगर्भगुम्फसुभगं काव्यं मुखे मण्डनम् ॥ ५४ ॥

इति मण्डनाङ्को मुग्धमेधाकरालंकारः । पण्डितप्रकाण्ड पं० रत्नमण्डन-गणिपुंगवैर्विहितः स्वपरोपकाराय ॥ ॥

No. 422. Padyapanchasika, by KAVINDRA [पद्यपञ्चाशिका—कवीन्द्रः].

Begins:

कस्तूरीकोशभासः कमलदलदृशः कौस्तुभाङ्कः कृपालुः
कालिन्दीकूलकेलिः कुलिशकरकृतिः कामिनीकण्ठमालः ।
कंसारिः कैटभारिः कलिकुलकदनः कौणपानां करालः
कल्पस्थाणुः कवीनां कलयतु कुशलं केशवः केशिकालः ॥ १ ॥

नत्वा कृष्णाङ्घ्रियुग्मं परमपदकरं रम्यराजीवरूपं
विश्वोत्पत्त्यैकबीजं भवभयहरणं कामधेनुं कृपालुम् ।
काशिस्थो गौडविप्रो हरिहररसिकः सेवकः सज्जनानां
कुर्वे सिद्धान्तसारं मुनिमनुजमतं पद्यपञ्चाशकीयम् ॥ २ ॥

Ends:

जीवो वा भार्गवो वा परमबलयुतः कामभावेषु यासां
कर्मेशो धर्मलाभे तनुसुखतनये कर्मकोशे बलस्थः ।
तासां चन्द्राननानां कमलदलदृशां नायका रूपयुक्ता
राजन्ते राजलक्ष्मीर्मणिमयरुचिरे दीप्तिभावे सदैव ॥ ४ ॥

इति कवीन्द्रविरचिता पद्यपञ्चाशिका समाप्ता ॥ ॥ संवत् १८७४ शाके १७३९ ॥

No. 424. Paitamahi, by MADHUSUDANA, with a commentary by GOPIRAJA [पैतामही-सभाष्या· मू· मधुसूदनः टी· गोपीराजः].

Begins:

श्रीगणेशायनमः ।

जयति जगति शश्वच्छूलपाणिः कपाली
---------लिदेशे प्रसन्नः ।
धवलवृषभगामी पञ्चवक्त्रोऽहिभूष-
स्तुहि नागे---------नेत्रः ॥ १ ॥

विघ्नेशमाद्यं प्रणिपत्य मूर्ध्ना गुरुं तथा श्रीमधुसूदनाख्यम् ॥
श्री--रावो ननु धर्म--पैतामहीभाष्यमहं करोमि ॥ २ ॥

Ends:

आसीत्पार्थपुरे वरे द्विजवरः श्रीगोपीराजाभिधः
सिद्धान्ताभिनवोद्यमैककुशलो दैवज्ञचूडामणिः ।
तज्जः श्रीपतिरग्रणीः कृतविधौ सिद्धान्तपारं गत-
स्तत्सूनुर्मधुसूदनाख्यगणकः पैतामहीं निर्ममे ॥ ----

गङ्गातीरनिवासिपार्थिवपुरे श्रीरामकृष्णात्मजो
भारद्वाजकुलेऽभवत्सुगणकः श्रीगोपीराजाभिधः ।
तन्त्रं कल्पत ---कारसुलभं यो मर्त्यलोके तथा
दैवज्ञप्रतिकण्ठभूषणमलं स ------

No. 438. Lilavatitika, by LAKSHMIDASA [लीलावतीटीका—लक्ष्मीदासः].

Begins:

श्रीगणेशाय नमः ।

नत्वा लक्ष्मीकान्तं लक्ष्मीदासो गिरं गुणाधीशम् ।
विवृणोति गणितलीलावतीं समालोच्य पूर्वकृतीः ॥ १ ॥

शिष्टा - - ग्रन्थारंभे प्रत्यूहसमूहव्यपोहायाभीष्टदेवतानमस्कारपूर्वकं संबन्धप्रयोजनाभिधानं कुर्वन्ति ॥

Ends:

यं प्राप्ता - - - - शुचिमातिः श्रीमांश्च वाचस्पाति-
र्लक्ष्मीदासमभाणि तेन गणिते यस्तत्वचिन्तामणिः ।
तत्खण्डे विशदे विशेषसहिते लालित्य लीलावती-
व्याख्याने विमलोंऽकपासगणिताध्यायः समाप्तिं गतः ॥

इति श्रीमद्वाचस्पतिमिश्रसूनुलक्ष्मीदासविरचिते भास्करीयगणितपाटी-लीलावतीव्याख्यानेंऽकपासाध्यायः समाप्तः ॥ संवत् १७२८ वर्षे द्वितीय-वैशाखसुदि प्रतिपद्दिने शुक्रवारे विनविमलेन स्वयमालेखि आत्मपठनार्थम् । शुभं भूयात् ॥

No. 445. Samvitprakasa, by GOVINDA [संवित्प्रकाशः—गोविन्दकवीश्वरः].

Begins:

श्रीमद्विष्णुममेयशक्तिमखिलाकल्पं किरीटाङ्गद-
द्योतत्कुण्डलमुद्यदर्करुचिरं पीताम्बरं हारिणम् ।
पद्मस्थं हृदयस्थकौस्तुभमणिं हस्तस्थचक्रोल्लस-
च्छङ्खाम्भोजगदं मुदं विदधतं भक्त्या भजेऽभीष्टदम् ॥ १ ॥

Ends:

काह्नकवीश्वरनन्दनगोविन्दकवीश्वरेण निर्णीते ।
संवित्प्रकाशकाव्ये विजयादिविदा चतुर्दशः सर्गः ॥ १४ ॥

श्रीगोविन्दकवीशमीशभजनप्राप्तं ककुप्शाग्रणीः
श्रीमत्काह्नकविः सुतं प्रसुषुवे श्रीकर्मदेवी च यम् ।
वेदान्तां व्रज भास्वतार्थबहुलं संवित्प्रकाशाभिधं
काव्यं तेन नूनं समाप्तिमगमद्विद्वज्जनानन्दनम् ॥ १५ ॥

इति श्रीसंवित्प्रकाशः समाप्तः ॥

No. 460. Atankadarpana, by VACHASPATI [माधवनिदानटीका—आतंकदर्पणनाम्नी—वाचस्पतिः].

Begins:

श्रीमहागणाधिपतये नमः। श्रीगुरवे नमः। अधुनाऽतंकदर्पणो लिख्यते ॥

तुलसीकुसुमं दधत्तमालं बल्लुबिगोपवाससक्तम्।
किमपि त्रिभुवनैकमूलकन्दं परमानन्दमहमहो स्मरामि ॥ १ ॥

श्रीहम्मीरनरेश्वरः समभवद्विरः प्रतापानल-
ज्वालाजालकरालदग्धयवनप्राग्भारशुष्केन्धनः।
यस्य प्रौढसभाङ्गणेष्वपि यशः स्वर्लोककल्लोलिनी-
कल्लोलामलमङ्गनाः सुमनसां गायन्ति रोमाञ्चिताः ॥ २ ॥

प्रत्यर्थं क्षितिनाथसार्थवनितावैधव्यदीक्षागुरोः
शौर्यं यस्य रणाङ्गणे सुरगणैः पश्यन् सुराणां पतिः।
लब्ध्वा नेत्रसहस्रकं फलमलं स्मृत्वा निजाभ्यर्थितं
रामं रावणघातिनं समभवत्तुष्टोविलक्षः पुनः ॥ ३ ॥

तस्याभवद्वैद्यवरः प्रभूतो विश्वासपात्रं विदितश्चरित्रैः।
प्रमोदनामा सकलप्रमोदी कलाविलासैकनिधिर्द्विजेन्द्रः ॥ ४ ॥

ज्येष्ठोऽभवत्तस्य सुतः प्रशस्तः शास्त्रार्थवेत्ता शिवशक्तिचेताः।
रैशर्मनामा प्रथितः कलाभिर्महम्मदक्षोणिपतेः सभायाम् ॥ ५ ॥

अन्योऽपि तस्यास्ति सुतः कनीयान्वाचस्पतिः सत्वगुणैकसंगतिः।
सहोदराः प्रीततमाः समस्तायुर्वैद्यविद्यां स्वयमध्यगीयन् ॥ ६ ॥

भृगुवचनविचारैश्चारुचञ्चच्चरित्रं
चरकचतुरचेताः सुश्रुते सुश्रुतो यः।
कपिलमिव वयस्ये ब्रह्मविद्यारहस्ये
प्रकटितपटुबुद्धिर्बुद्धकाणादसिद्धिः ॥ ७ ॥

तेनोज्ज्वला विवृत्तिरल्पधियां हिताय
संबध्यते विबुधमाधवसंग्रहस्य।

विज्ञाय तार्किकवरैकविचारवेद्यं
वैषम्यगुम्फनवशान्मधुकोशबन्धम् ॥ ८ ॥

ग्रन्थारम्भे प्रारब्धग्रन्थपरिसमाप्त्यर्थं ग्रन्थश्रोतृणामपि प्रत्यूहव्यूहव्युदासार्थं शिष्टाचारपरिपालनार्थं च ग्रन्थकारः प्राग् विशिष्टदेवताप्रणामं निबद्धवान् ॥

प्रणम्य जगदुत्पत्तिस्थितिसंहारकारणम् ।
स्वर्गापवर्गयोर्द्वारं त्रैलोक्यशरणं शिवम् ॥ १ ॥

नानामुनीनां वचनैरिदानीं समासतः सद्भिषजां नियोगात् ।
सोपद्रवारिष्टनिदानलिङ्गो निबध्यते रोगविनिश्चयोऽयम् ॥ २ ॥

युग्मम् ।

Ends:

सुभाषितं तत्र यदस्ति किञ्चित् तत्सर्वमेकीकृतमत्र यत्नात् ।
विनिश्चयेत्सर्वरुजां नृणां वा यन्माधवेनेन्दुकरात्मजेन ॥

यत्कृतं सुकृतं किंचित् कृत्वैनं रुग्विनिश्चयम् ।
मुञ्चन्तु जन्तवस्तेन नित्यमातंकसन्ततिम् ॥

इत्यातंकदर्पणे निदानव्याख्यायां विषनिदानं समाप्तम् । शुभं भूयात् । संवत् १८४१ मिति० माघसुदि १४ चन्द्रे लिखितं पूर्णतामागात् । लिखायितं वैद्यचन्द्रभानुनाम्ना ॥ शुभं भूयात् ।

लिखितेन निदानेन माधवेनैव माधवः ।
प्रीयतां गोकुलेशश्च स्वर्गवैकुण्ठदः प्रभुः ॥

श्रीमद्गोकुलनाथस्य पदौ नत्वा प्रसन्नधीः ।
दर्शनानन्दसुखतो नैति पाप्यपि दुर्गतिम् ॥

कृष्णः कृष्णसखो मह्यं प्रीयतां कृष्णयावृतः ।
कृष्णभक्तः सदा देवः सर्वं पायाज्जगत्प्रभुः ॥

No. 500. Mantrachandrika, by KASINATHA [मन्त्रचन्द्रिका—काशीनाथः].

Begins:

श्रीगणेशाय नमः । श्रीदक्षिणामूर्तिगुरुभ्यो नमः ।

विश्वेश्वरं नमस्कृत्य मातरं पितरं तथा ।
काशीनाथः प्रतनुते सिद्धिदां मन्त्रचन्द्रिकाम् ॥

तत्रादौ गुरुलक्षणम् । श्रोत्रियो ब्रह्मनिष्ठः । तत्वप्रतिपादनसमर्थः ॥

Ends:

विश्वेश्वरीं विशालाक्षीं ढुंढिराजं च माधवम् ।
दण्डपाणिं कालराजं स्मरन् सिद्धिमवाप्नुयात् ॥

इति श्रीमद्भट्टोपनामकशिवरामभट्टाङ्गजजयरामभट्टाभिधशिवभक्तसूनुमन्त्रशास्त्रप्रवीणदक्षिणाचारमतप्रवर्त्तककाशीनाथविरचिता मन्त्रचन्द्रिका समाप्ता । श्रीदक्षिणामूर्तिशिवार्पणमस्तु ॥

No. 510. Ramarchanachandrika, by ANANDAVANA [रामार्चनचन्द्रिका—आनन्दवनः].

Begins:

तर्तुं संसृतिवारिधिं त्रिजगतां नौर्नाम यस्य प्रभो-
र्येनेदं सकलं विभाति सततं जातं स्थितं संहृतम् ।
यश्चैतन्यघनप्रमाणविदुरो वेदान्तवेद्यो विभु-
स्तं वन्दे सहजप्रकाशममलं श्रीरामचन्द्रं परम् ॥ १ ॥

Ends:

असौ सर्वभूतान्तरात्मा रामचन्द्रः प्रचोदयात् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमन्मुकुन्दश्रीचरणशिष्यानन्दवनविरचितायां श्रीरामार्चनचन्द्रिकायां चतुर्थः पटलः ॥ १४ ॥

॥ समाप्तेयं श्रीरामार्चनचन्द्रिका ॥ संपूर्णं चतुर्थपटलम् ॥

No. 546. Ashtasahasrivivaranam, by YASOVIJAYA [अष्टसहस्री-विवरणम्—यशोविजयः].

Begins:

ऐंद्रमहः प्रणिधाय न्यायविशारदयतिर्यशोविजयः ।
विषमामष्टसहस्रीमष्टसहस्र्या विवेचयति ॥ १ ॥

सिताम्बरशिरोमणिर्विदितचारुचिन्तामणि-
र्विधाय हृदि रुच्यतामिह समानतन्त्रे नये ।
अनर्गलसमुच्छलद्बुलतर्कवर्णोदक-
च्छटाभिरयमुत्सवं वितनुते विपश्चित्कुले ॥ २ ॥

स्याद्वादार्थः क्वापि कस्यापि शास्त्रे यः स्यात्कश्चिद्दृष्टिवादार्णवोत्थः ।
तस्याख्याने भारती सस्पृहा मे भक्तिव्यक्तेर्नाग्रहोऽणौ पृथौ वा ॥ ३ ॥

अम्भोराशेः प्रवेशे प्रविततसरितां सन्ति मार्गा इवोच्चैः
स्याद्वादस्यानुयोगे कति कति न पृथक् संप्रदाया बुधानाम् ।
शक्यः स्वोत्प्रेक्षितार्थैरुचिविषयतां तत्र नैकोऽपि नेतुं
जेतुं दुर्वादिवृन्दं जिनसमयविदः किं न सर्वे सहायाः ॥ ४ ॥

समन्तभद्रोऽत्र हि कारिकाणां कर्त्ता तु वक्ता त्वकलंकदेवः ।
व्याख्याति भाष्यानुगमेन विद्यानन्दोऽप्यमन्दोद्यमतः स्फुटं ताः ॥ ५ ॥

श्रेय इति अलंकरणे इत्यत्रन्वयि । श्रीवर्द्धमानस्येति ॥

Ends:

ज्ञानेन्यहेतुश्च निजप्रसादात् ॥

इति श्रीमदकबरसुरत्राणप्रदत्तजगद्गुरुविरुदधारकभट्टारकश्रीहीरविजयसूरीश्वरशिष्यमुखमहोपाध्यायश्रीकल्याणविजययगणिशिष्यावतंसपण्डितश्रीलाभविजयशिष्याग्रेसरपण्डितश्रीजीतविजयगणिसतीर्थ्यालंकारपण्डितश्रीनयाविजयगणिचञ्चरीकचरणकमलेन पण्डितश्रीपद्मविजयगणिसहोदरेण महोपाध्यायश्रीयशोविजयगणिना विरचिते अष्टसहस्रीविवरणे दशमः परिच्छेदः ॥ १० ॥

No. 548. Acharapradipa, by RATNASEKHARA [आचारप्रदीपः—रत्नशेखरसूरिः].

Begins:

प्रणम्य पार्श्वनथस्य पत्कजं सर्वसौख्यदम् ।
समस्तमङ्गलश्रेणीलताप्रबलतावृतम् ॥ १ ॥

Ends:

वीर्याचारविचारचारिमचणः संवेगरङ्गोल्वण-
प्राणिश्रोत्रसुधाभिवर्षनिपुणः पुण्यक्रियोत्सर्पणः ।
श्रीसूरीश्वररत्नशेखरगुरूत्तंसैः प्रकाशीकृते
शास्त्रेऽस्मिन्निति पञ्चमः समजनि श्रीमान् प्रकाशः स्फुटः ॥ १ ॥

इति तपागच्छनायकश्रीसोमसुन्दरमुनिसुन्दरसूरिपट्टप्रतिष्ठितश्रीरत्नशेखरसूरिविरचिते श्रीआचारप्रदीपे पञ्चमः प्रकाशः ॥ ॥

विख्याततपेत्याख्या जगति जगच्चन्द्रसूरयोऽभूवन् ।
श्रीदेवसुन्दरगुरूत्तमाश्च तदनुक्रमाद्विदिताः ॥ १ ॥
पञ्च च तेषां शिष्यास्तेष्वाद्या ज्ञानसागरा गुरवः ।
त्रिविधा च चूर्णिलहरिप्रपठनतः सान्वयाह्वानाः ॥ २ ॥
श्रुतगतविविधालापकसमुद्धृतः समभवंश्च सूरीन्द्राः ।
कुलमण्डना द्वितीयाः श्रीगुणरत्नास्तृतीयाश्च ॥ ३ ॥
षट्दर्शनवृत्तिक्रियारत्नसमुच्चयविचारनिचयसृजः ।
श्रीभुवनसुन्दरादिषु भेजुर्विद्यागुरुत्वं ये ॥ ४ ॥
श्रीसोमसुन्दरगुरुप्रवरास्तुर्या अहार्यमहिमानः ।
येभ्यः संततिरुच्चैर्भवति द्वेधा सुधर्मभ्यः ॥ ५ ॥
यतिजितकल्पविवृत्तेश्च पञ्चमाः साधुरत्नसूरिवराः ।
यैर्मादृशोऽप्यकृष्यत करप्रयोगेण भवकूपात् ॥ ६ ॥
श्रीदेवसुन्दरगुरोः पट्टे श्रीसोमसुन्दरगणेन्द्राः ।
युगवरपदवीं प्राप्तास्तेषां शिष्याश्च पञ्चैते ॥ ७ ॥

मारीत्यत्रमनिराकृति सहस्रनामस्मृतिप्रभृतिकृत्यैः ।
श्रीमुनिसुन्दरगुरवश्चिरंतनाचार्यमहिमभृतः ॥ ८ ॥
श्रीजयचन्द्रगणेन्द्रा निस्तन्द्राः संघगच्छकार्येषु ।
श्रीभुवनसुन्दरवरा दूरविहारैर्गणोपकृतः ॥ ९ ॥
विषममहाविद्यातद्विडम्बनाब्धौ तरीव वृत्तिर्यैः ।
विदधे यज्ज्ञाननिधिं मदादिशिष्या उपाजीवन् ॥ १० ॥
एकाङ्गा अप्येकां दशाङ्गिनश्च जिनसुन्दराचार्याः ।
निर्ग्रन्थाः ग्रन्थकृतः श्रीमज्जिनकीर्तिगुरवश्च ॥ ११ ॥
एषां श्रीसुगुरूणां प्रसादतः षट्कुतिथिमिते १५१६ वर्षे ।
जग्रन्थ ग्रन्थमिमं सुगमं श्रीरत्नशेखरः सूरिः ॥ १२ ॥
अत्र गुणसत्रविज्ञावतंसजिनहंसगणिवरप्रमुखैः ।
शोधनलिखनादिविधौ न्यधायि सांनिध्यमुद्युक्तैः ॥ १३ ॥
प्रत्यक्षरं निरीक्ष्यास्य विपश्चिद्भिर्विनिश्चिता ।
पञ्चषष्ठ्यधिकाऽनुष्टुप्सहस्राणां चतुष्टयी ॥ १४ ॥
तच्छोधयन्तु सुधियो यन्मतिमान्द्यादवद्यमुदितमिह ।
ग्रन्थोऽयं चिरसमयं जयताज्जयदायश्च विदाम् ॥ १५ ॥

इत्याचारप्रदीपग्रन्थः । संख्या ४०६५ संपूर्णा ॥ संवत् १६९५ वर्षे वैशाखवादि १४ रवौ अद्येह श्रीपत्तने जोसीभीमजीलिखितं ॥ श्रीशुभं भवतु ॥ कल्याणमस्तु ॥

No. 554. **Upamitibhavaprapanchakathasaroddhara,** by DEVENDRASURI [उपमितिभवप्रपञ्चकथा सारोद्धार :—देवेन्द्रसूरिः].

Ends :

श्रुत्वैनामनुसुन्दरस्य च महीभर्तुः कथामद्भुतां
भो भव्याः शरणं जिनागममिमं यूयं श्रयध्वं सदा ।
यो(ये)नोच्चैर्गुरुकर्मका अपि जवादस्य प्रसादाद्यदयं (प्रसादाद्वयं)
निर्धूया(निर्धूया)खिलमप्यनश्वरसुखं श्रेयःश्रियं प्राप्नुतः (प्राप्नुमः)
॥ ६१९ ॥

इति श्रीचन्द्रसूरिशिष्यश्रीदेवेन्द्रसूरिविरचिते उपमितिभवप्रपञ्चकथासारोद्धारे पूर्वसूचितमीलवकवर्णनो नाम अष्टमः प्रस्तावः समाप्तः ॥

समाश्रितो यः शरणं क्षमाभृद्गणेन कर्माक्षनिपातभीत्या ।
अवारपाराश्रियमादधानः स चन्द्रगच्छोऽस्ति भुवि प्रसिद्धः ॥ १ ॥

भव्यारविन्दप्रतिबोधहेतुरखण्डवृत्तः प्रतिषिद्धदोषः ।
श्रयन्नपूर्वेन्दुतुलामिह श्रीभद्रेश्वरो नाम बभूव सूरिः ॥ २ ॥

तत्पट्टपूर्वाचलचण्डरोचिरजायत श्रीहरिभद्रसूरिः ।
मुदं न कस्मै रहितं विकृत्या तपश्च वित्तं च तनोति यस्य ॥ ३ ॥

श्रीमानथाजायत शान्तिसूरिर्यतः समुद्रादिव शिष्यमेघाः ।
ज्ञानामृतं प्राप्य शुभोपदेशवृष्ट्या व्यधुः कस्य मनो न शस्यम् ॥४ ॥

ततो बभूवोभयदेवसूरिर्यदीयवाणी गुणरत्नहृद्या ।
मेध्या भरेन्दुलसिता विभाति वेलेव मध्यस्थजिनागमाब्धेः ॥ ५ ॥

प्रसन्नचन्द्रोऽथ बभूव सूरिर्वक्तुं गुणान् यस्य नाहि क्षमोऽभूत् ।
सहस्रवक्त्रोऽपि भुजङ्गराजस्ततो ह्रिया वैष रसातलेऽगात् ॥ ६ ॥

अथाजनि श्रीमुनिरत्नसूरिः स्वबुद्धिनिर्धूतसुरेन्द्रसूरिः ।
रचन्ति शास्त्राण्यखिलानि यस्य स्थिरोन्नते मानसरोहणाद्रौ ॥ ७ ॥

श्रीचन्द्रसूरिस्तु गुरुस्ततोऽभूत्प्रसन्नतालंकृतयस्तदोषम् ।
चित्तं च वाक्यं च वपुश्च यस्य कं न प्रमोदात् पुलकं करोति ॥ ८ ॥

सूरिर्यशोदेव इति प्रसिद्धस्ततोऽभवद्यत्पदपङ्कजस्य ।
रजोभिरालिङ्गितमौलयोऽपि चित्रं पवित्राः प्रणता भवन्ति ॥ ९ ॥

तत्पाणिपद्मोल्लसितप्रतिष्ठः श्रीचन्द्रसूरिप्रभुशिष्यलेशः ।
देवेन्द्रसूरिः किमपीति सारोद्धारं चकारोपमितेः कथायाः ॥ १० ॥

इतश्च शिष्यो गणधारिदेवानन्दस्य रत्नप्रभसूरिपट्टे ।
बभूव सूरिः कनकप्रभाख्यो निधिर्गुणानामिह चन्द्रगच्छे ॥ ११ ॥

तदीयशिष्यः किल बालचन्द्रसूरेः कवीन्द्रादुदितप्रतिष्ठः ।
अशोधयद्बोधिविशुद्धयेऽमुं प्रद्युम्नसूरिर्विनयोपरुद्धः ॥ १२ ॥

यच्चान्यदप्यत्र निवेशितं स्यादन्यादृशं किञ्चन बुद्धिमान्द्यात् ।
अयं निबन्धोऽञ्जलिरस्ति सर्वं तत्साधु निवेशनीयम् ॥ १३ ॥

श्रीविक्रमादित्यनरेन्द्रकालादष्टानवत्यर्यम १२९८ संख्यवर्षे ।
पुष्यार्कभृत्कार्त्तिककृष्णषष्ठ्यां संपूर्णतामेष समाससाद ॥ १४ ॥

यावन्नौरिव भव्यतारणविधावास्ते भवाम्भोनिधौ
श्रीसिद्धेन कृता कथेयममार्हद्वाक्यकाष्ठोच्चयैः ।
तावत्तद्गतसत्पदार्थनिचयस्योदञ्चनेऽसौ क्षमा
सारोद्धारकृतिः सदा तदनुगा नौकेव संसर्पतु ॥ १५ ॥

प्रत्यक्षरं निरूप्यास्य ग्रन्थमानं विनिश्चितम् ।
शतानि सप्तपञ्चाशत्त्रिंश ५७३० त्समधिकान्यहो ॥ १६ ॥

अङ्कतोऽपि श्लोक ५७३० ॥ उपमितिभवप्रपञ्चकथा ॥

No. 590. Navyabrihatkshetrasamasa, by SOMATILAKA with the Avachuri by GUNARATNASURI [नव्यबृहत्क्षेत्रसमासः—सावचूर्णिः मू॰ मा॰ सोमतिलकः अव॰ गुणरत्नसूरिः].

Begins :

सिरिनिलयं केवलिणं अवितहवयणं नमित्तु वीरजिणं ।
नरखित्तविआरलवं वुच्छामि सुआउ सपरहिअं ॥ १ ॥

Ends :

इअ नरखित्तविआरो सोमतिलयसूरिणा समासेणं ।
लिहिऊ सपरेसि हिऊ सोहेअव्वो सुअहरेहि ॥ ३३ ॥

एवं सर्वं गाथाः ॥ ३८८ ॥ इति नव्यबृहत्क्षेत्रसमासः ॥ फाल्गुनमासे त्रयोदश्यां तपागच्छनायकभट्टारकप्रभुपरमगुरुश्रीश्रीरत्नशेखरसूरिशिष्यपुंगवपंडितसत्यहंसगणिवाचनाचार्यपुरंदराणां विनेयेन हंसगणिना फलहीग्रामवरेऽलेखि स्वपरोपकाराय ॥ सं॰ १५११ वर्षे ॥

भग्नपृष्टिकटिग्रीवं मध्यदृष्टि अधोमुखम् ।
कष्टेन लिखितं शास्त्रं यत्नेन परिपालयेत् ॥ १ ॥

Avachuri ends :

स्फूर्जद्गुणप्रकरवासितविष्टपानां
श्रीदेवसुन्दरमहत्तमसूरिराज्ञाम् ।
शिष्योऽवचूर्णिमकरोद्गुणरत्नसूरिः
संस्कारबोधविधये स्वपरार्थमेताम् ॥ १ ॥

श्रीवृद्धक्षेत्रसमाससक्ते विलोक्य लघुबृहद्वृत्ती ।
श्रीज्ञानसागरसूरिकृताऽवचूर्णिर्विरचितेयम् ॥

इति श्रीसोमतिलकसूरिविरचितस्य नव्यबृहत्क्षेत्रसमासस्यातिगंभीरार्थस्य श्रीगुणरत्नसूरिकृतावचूर्णिः ॥

No. 609. Mahapurushacharitram, by MERUTUNGA [महापुरुषचरित्रम्—मेरुतुङ्गाचार्यः].

Begins :

ओं नमः परमात्मने । श्रीगुरुभ्योनमः ॥

जयति स परमात्मा केवलज्ञानमूर्तिः
दलितनिखिलकर्मा शाश्वतानन्दमग्नः ।
हृदयकमलमन्तर्यस्सदालोक्यमानः
प्रवितरति मुमुक्षोर्मोक्षलक्ष्मीं प्रपन्नः ॥ १ ॥

श्रीऋषभनेमिशान्तिश्रीमत्पार्श्ववर्धमानानाम् ।
भवसहितान्यपि नूनं रचयिष्यन्तेऽत्र चरितानि ॥ २ ॥

शेषमहापुरुषाणामस्मिन्सूत्रे तु संगृहीतानाम् ।
तद्गुणमात्रग्रहणाद्रचयिष्यन्तेऽत्र चरितानि ॥ ३ ॥

श्रुतिमार्गगः प्राय उपदेशोगतागतैः ।
यदि विश्राम्यति श्रान्तः कस्यापि कृतिनो हृदि ॥ ४ ॥

तथाहि ।

ग्रन्थारम्भे इष्टदेवताप्रणिधानप्रधाना प्रेक्षावतां प्रवृत्तिरित्यौचित्यात्तत्र प्रथमनमस्कारो यथा ।

प्रणिधाय परं ज्योतिर्नत्वा चन्द्रप्रभुं (प्रभं) गुरुम् ।
उपदेशशर्तीं कुर्वे मुक्तमुक्ताफलस्रजम् ॥ १ ॥

स्पष्टः । अथ सर्वजिनप्रणीतस्य चतुर्द्धाधर्मस्य दानमेवोत्तमं प्रथमं दृष्टान्तेनोपदिशन्नाह ।

दद्याद्दानं सुपात्रायोन्नतये सुकृती यथा ।
घृतदानान्मुनेरासीत्प्रथितः प्रथमो जिनः ॥ १ ॥

इति श्रीमेरुतुंगाचार्यविरचिते महापुरुषचरिते श्रीयुगादिजिनवर्णनो नाम प्रथमः सर्गः ॥

इति श्रीमेरुतुंगाचार्यविरचिते उपदेशविवरणे महापुरुषचरिते सगरसुतमघवसनकुमारश्रीशान्तिनाथचरितमुनिसुव्रतश्रीरामचरितवर्णनो नाम द्वितीयः सर्गः ॥

इति श्रीमेरुतुंगाचार्यविरचिते महापुरुषचरिते श्रीनेमीश्वरजीपार्श्वनाथपूर्वभवसहितचरितवर्णनो नाम तृतीयः सर्गः ॥

इति श्रीमेरुतुंगाचार्यविरचिते उपदेशविवृतरूपे महापुरुषचरिते चतुर्थः सर्गः ॥ संवत् १६४९ वर्षे प्रथमाषाढे श्रीजिनचन्द्रसूरिराज्ये वा० समयकलशगणिवराणां शिष्येण सुखनिधानगणिना लिपी च०

Ends :

अथ सूत्रम् । प्रचुरेष्वपि शिष्येषु भक्तिमान् रञ्जयेद् गुरुम् ।
वज्रस्वामी सूरिविद्यां वज्रसेने यथा न्यधात् ॥ ९९ ॥

अथ कदाचित् श्रीवज्रस्वामी कफप्रादुर्भावेन नागरौषधखण्डकरणे नियोज्य अनाभोऽगात् मुखवस्त्रिकाप्रत्युपेक्षणक्षणे तद्रूपीठलुठितं वीक्ष्य प्रमादे संयमो न स्यात् । निष्कलङ्कः कथं च न । तं च मानुषं जन्मजीवितं च निरर्थकम् । अथ द्वादशवार्षिके दुर्भिक्षेऽन्नदौःस्थ्ये संजाते शुद्धानूपान्ना-

प्राप्त्याऽनशनं चिकीर्षुः । श्रीवज्रस्वामी वज्रसेनमुनिं प्रत्याह यत्र लक्षेनैकेन एकस्थाली उत्तरति तत्र गत्वा स्थातव्यम् । अथ शेषमुनीन् प्रत्याह ।

सव्वथ संजमं संजमा उप्पाणमेव रक्खिज्जा ।
मुच्चइ अइवा याउ पुणोविसोहीन सेविरई ॥ १ ॥

अथ मुनयो गुरून् विज्ञापयामासुः ।

पिण्डं असो हयंतो अविरित्ती द्रस्थ ससउनस्ति ।
चारित्तं मिअसन्ते सव्वादिग्कानिररकया ॥ २ ॥

अतो वयममुं देहमपहातुमीहामहे इति तदनुमतो निःसीमसौभाग्यनिधिर्भगवान् वज्रसेनवर्जं पञ्चशतानि तपोधनानां क्षुल्लकमेकं तलग्रामे सुप्तं परित्यज्य मुनीन् सह गृहीत्वा गिरिमारुरोह । स क्षुल्लकः प्रभाते कृतानशनः प्रथमं स्वर्गं जगाम । अथ स तद्वपुषि पूजार्थं सुरानागतो विलोक्य परिवारेण विज्ञप्ता गुरवः । क्षुल्लकवृत्तान्तं कल्पितोपयोगा विज्ञापयामासुः । अथ तान् धाराधिरूढवैराग्यसाहस्रान् काचित् मिथ्यादृग्देवता कल्पितमानुषीवेषा विविधानि भोज्यवस्तूनि उपनीय निमन्त्रितवती । भगवान् वज्रस्वामी तस्या अवग्रहं प्रीतिहेतुमवगम्य तं गिरिं परिहृत्य प्रत्यासन्नं पर्वतान्तरमधिरुह्य तद्देवताया अनुज्ञापनार्थं कायोत्सर्गं कृत्वा सभक्तिकं तत्पर्वतदेवतया सेव्यमानः अनशनं प्रतिपाल्य स्वर्गं प्राप । अनेन महात्मना सह दमशमं पूर्वं तुर्यं संहननं व्यवच्छिन्नं महर्षीणां निर्वाणे तीर्थभूमिरिति रथारूढेण शक्रेण प्रदक्षणीकृत इति स हि गिरिः रथावर्त्त इति पप्रथे । अथ वज्रस्वामिशिष्यश्रीवज्रसेनः सोपारे प्राप्तः गोचरचर्यां काले जिनदत्तस्य गृहमुपेतस्तेन ईश्वरीनाम्न्या तत्पत्न्या च ससंभ्रममुत्थाय प्रणतोऽस्या लक्ष्यमूल्यद्रव्योदनसिद्धायां स्थाल्यां विषं निक्षिप्य आगामिनि दिने एतावता द्रव्येणान्नस्याप्राप्तिं विमृश्य सपुत्रोऽपि तदन्नमुपभुज्य विपद्यामहे इति विज्ञप्तोऽवज्ञस्तान् मरणान्निषिध्य स स्वयमुपात्तभिक्षुः परणकं चकार । तान् सर्वान् दीक्षयाऽनुजग्राह । अतः प्रातः पञ्चशतेषु प्रवहणेषु धान्यपूर्णेषु समागतेषु सुभिक्षे संजाते सुखेन संयमं चन्द्रनागेन्द्रनिर्वृत्तिविद्याधर इत्याभिधानैश्चतुर्भिर्मुनिभिरुपास्यमानः सर्वेषामन्येषां च प्रतिबोधं यच्छन् प्रति-

पालयामास तेषां चतुर्णां चत्वारो गच्छा बभूवुः । अथोपदेशशतस्य संग्रहमाह श्रीसर्वज्ञस्याज्ञापालनमेव समस्तोपदेशानां रहस्यं विमृश्य तथा कथंचित् चारित्रं यातितव्यं यथा संसारे पुनर्नायाति । इति धर्मोपदेशशतक-सूत्रस्य सर्वसंग्रहः संपूर्णः । श्री । इति श्रीमन्मेरुतुंगाचार्यविरचिते धर्मोप-देशशतकविवरणे महापुरुषाविरचिते पञ्चमः सर्गः ॥

प्रोन्मीलद्वज्रमूलः सरलतरलसद्धूरिशाखाभिरामः
सज्ज्योतिः साधुरत्नावलिदलपटलः कीर्त्तिदिव्यप्रसूनः ।
यच्छन् वांछातिरिक्तान्यभिलषिन्यन्वहं (लषन्नन्वहं) पुण्यभाजां
श्रीमन्नागेन्द्रगच्छो जगति विजयतां जंगमकल्पवृक्षः ॥ १ ॥

यत्प्रोक्तं हितशास्त्रगौरवभयाद्यच्छ्रोतृवर्गस्य च
श्रोत्राणां कटुताकरं कुसमयस्फुर्त्तेयवाच्यं च यत् ।
उत्सूत्रं प्रबलप्रसादवशतः प्रोक्तं मया साधु यत्
तत्सर्वं श्रुतिमूर्तिरेष भगवान् साक्षाज्जिनः क्षामतु (क्षाम्यतु) ॥ २ ॥

इति श्रीग्रन्थस्य श्लोकसंख्या । ग्रं० १२७४ ॥ शुभं भवतु श्रीः ॥ संवत् १६४९ वर्षे अषाढमासे कृष्णपक्षे शनौ सिद्धियोगे । श्रीबृहत्खरतरगच्छे श्रीजिनचन्द्रसूरिराज्ये श्रीसागरसूरिशाखायां वाचनाचार्यधुर्यवर्यसाधुलाल-गणि तत् शिष्य वा० चारुधर्मगणि तत्शिष्यवाचनाचार्यधुर्यवर्यश्रीसमय-कलशगणिगजेन्द्राणां तत्शिष्यमुख्यपं० सुखनिधानगणिना लिपी चक्रे अमरसरेऽकबरराज्ये संवत् १७७१ वर्षे श्रावणसुदि ८ दिने पण्डितश्रीवीर-मसागरगणयो दिवं गताः । तेषां श्रेयोऽर्थे पण्डितदोलतिरामगणिना श्रीवि-क्रमपुरज्ञानरत्नकोशे इदं पुस्तकं प्रदत्तम् ।

No. 615. Yogabindu, by HARIBHADRA, with a commentary [योगबिन्दुः—सटीकः मू॰ हरिभद्रसूरिः].

Commentary begins:

सद्योगचिन्तामणितोऽनणीयो येनाधिजिग्ये जगतः पतित्वम् ।
स योगिवृन्दारकवृन्दवन्द्यो घतादवद्यानि घनं जिनो नः ॥ १ ॥

सुधाबिन्दाविवानन्दममन्दमुपाचिन्वतः ।'
योगबिन्दोः समासेन वृत्तिरेषा विधीयते ॥ २ ॥
गुरूपदेशो न च तादृगस्ति मतिर्न वा काचिदुदाररूपा'।
तथापि योगप्रियतावशेन यत्नस्तदाभ्यासकृते यथेयम् ॥ ३ ॥

तस्य चेदमादिसूत्रं नत्वेत्यादिश्लोकद्वयम् ॥

Text begins :

नत्वाद्यन्तविनिर्मुक्तं देवं योगीन्द्रवन्दितम् ।
योगबिन्दुं प्रवक्ष्यामि तत्त्वसिद्ध्यै महोदयम् ॥ १ ॥
सर्वेषां योगशास्त्राणामविरोधेन तत्त्वतः ।
सन्नीत्वा स्थापकं चैव मध्यस्थांस्तद्विदः प्रति ॥ २ ॥

Text ends :

समुद्धृत्यार्जितं पुण्यं यदेतद् शुभयोगतः ।
भवान्ध्यविरहात्तेन जनः स्ताद्योगलोचनः ॥

Commentary ends :

योग एव लोचनमक्षि यस्य तथा विरह इति । इति च भगवतः श्रीहरिभद्रसूरिः स्वप्रकरणाङ्कप्रद्योतक इति ॥

समाप्ता चेयं योगबिन्दुप्रकरणवृत्तिः ॥

No. 618. **Ruchitadandakastuti,** by JINESVARA with commentary [रुचितदण्डकस्तुतिः सटीका-मू० जिनेश्वरसूरिः-टी० पद्मराजः].

Commentary begins :

श्रीनाभिजातं प्रणिपत्य भावतः श्रीशारदासौ च गुरुप्रभावतः ।
जिनेश्वरैः सूरिवरैर्विनिर्मितामर्थापयाम्यद्भुतदण्डकस्तुतिम् ॥ १ ॥

Text begins :

रुचितरुचिमहामणिस्वर्णदुर्वर्णनिर्वृत्तपावित्र्यभृत् —

Commentary ends :

॥ ॥ इति रुचितदण्डकस्तुतिव्याख्या ॥

खरतरगणगगनाङ्गणदिनेश्वरश्रीजिनेश्वरप्रभुभिः ।
चतुरचमत्कृतिजननी स्तुतिरेषा ज्यायसी विदधे ॥ १ ॥

तत्संतानेऽभूवन् भूवलयव्यापिकीर्त्तयः क्रमशः ।
वादिद्विपपारीन्द्राः श्रीमज्जिनहंससूरीन्द्राः ॥ २ ॥

तेषां शिष्यधुरीणा अतिप्रवीणाः श्रुताब्धिपारीणाः ।
श्रीपुण्यसागरमहोपाध्यायाः संप्रति जयन्ति ॥ ३ ॥

तच्चरणाम्बुजरोलम्बवाचनाचार्यपद्मराजेन ।
तद्वृत्तिरियं विहिता यदनृतमिह तद्बुधैः शोध्यम् ॥ ४ ॥

पूज्यजिनचन्द्रसूरिषु वर्यगणेश्वर्यमादधानेषु ।
फलवर्द्धिकानगर्यां जलनिधियुग्शशिकलावर्षे १६२४ ॥ ५ ॥

इति श्रीबृहज्जिनेश्वरसूरिकृतदण्डकस्तुतेर्वृत्तिः संपूर्णा ॥

No. 623. Vijayachandacharitram, by CHANDRAPRABHA-MAHATTARA [विजयचंदचरियं—चन्द्रप्रभमहत्तरः].

Begins :

सयलसुरासुरकिंनरविज्जाहरनरवरिंदथु अचलणं ।
जच्च सुवन्नसरीरं पणमह वीरं महावीरं ॥ १ ॥

कमलासन्ननिसन्ना कमलमुही कमलगब्भसमवन्ना ।
भुवणजणजणियतोसा जिणवाणी नमह भत्तीए ॥ २ ॥

निसुणउ सुअणो तह दुज्जणो य दोस गुणगहणगयाचित्तो ।
सिरिविजयचंदचरिए विविहं पूयाफलं भणिमो ॥ ३ ॥

Ends :

सिरिविजय- -महावयस्स सिरिअभयदेवसूरिस्स ।
सीसेण तस्स रइयं चंदप्पहमहयरेणेयं ॥ ९९ ॥

रइयं वित्थरराहियं चरियं सिरिविजयचंदकेवलिणो ।
गाहाछंदनिबद्धं भविवाण विबोहणट्ठाए ॥ ६० ॥
दयावडचरनगरे रिसहजिणंदस्स मंदिरे रइयं ।
नियवीरदेवसीसस्स साहुणो तस्स वयणेणं ॥ ६१ ॥
मुणिकरसंकरकाले निवस्स सिरिविक्कमस्स वट्टंते ।
रइयं फुडक्खरत्थं चंदप्पहमहयरेणेयं ॥ ६२ ॥
जावज्जसो ससिधवलो धवलइ महिमंडलं जिणिंदाणं ।
ताव इमं जयउ जए चरियं विजयचंदस्स ॥ १०६३ ॥

॥ इति श्रीविजयचन्द्रकेवलीचरित्रं समाप्तम् ॥

No. 625. Viseshavasyakavritti, by HEMACHANDRA [विशेषावश्यकवृत्तिः—हेमचन्द्रः].

Ends:

पूर्वं चाध्ययनपर्यंते व्याख्यानगाथानाम् । ७८२३ उभयं व्याख्यातगाथानां २६२३ शेषाणि तु भाष्यगाथानां चतुर्दशाधिकसप्तशतान्यतिदेशेनैव गतानि न तु व्याख्यातान्यतो नेह गणितानीत्येषा शिष्यहितानामविशेषावश्यकवृत्तिः परिसमाप्ता ॥ ॥ ॥ इह गंभीरापारजन्मजरामरणसलिलसंचयसंपूर्णा ॥ अनवरवत्ताग्यन्महामोहावर्त्तभीमे विविधविश्रोतसिकावेलाव्यतिकरदुरतिक्रमे । निःसंख्यकुविकल्पकल्लोलमालाकुले । प्रसरदज्ञानमहामेघदुर्दिनांधकारनिकुरंबभीषणे । अनेकापद्विद्युन्निपातसंपातमहाभये । रागद्वेषदुर्वातसंततिसंजनितहृदयोत्कंपे । अविश्रांतसंज्वलितक्रोधातिव्यैद्रवडवामुखे । अमानमानशैलस्खलनदुर्गोत्तुकृतगमागमव्यतिकरे । मायावल्लीवितानगुच्छवसन्ते । विभवसलिलातिदुःपूरलोलनहोदाविविधव्याधिसंबंधमत्स्यकछपपृष्ठपुच्छछटाटोपग्राहनक्रादिप्रभु (चु) रजलचरसंवरणसंजनितविषमसंचारे । शारीरमानसानंतदुःखप्रदापारसंसारवारांनिधौ मां निमग्नं विह्वलं निःशरणं दीनमवलोक्य कोपि करुणापरीतमानसःसद्गुणगुरु-- पुरुषसम्यग्दर्शनातिदृढमहाप्रतिष्ठानं । अष्टादशशीलांगसहस्रविचित्रफलक-

निविडघटनाविराजितं। सम्यक्ज्ञाननिर्यानकान्वितं। सुसाधुसंसर्गकायसूत्र-निविडबंधनबद्धम्। संवरकीलप्रभग्नानिःशेष श्रवद्वारं। सूत्रितसामायिकछेदोप-स्थानीयभेदभिन्नरम्यभूमिकाद्वयम्। तदुपर्युपकल्पितसाधुसमाचारकरणमंडपं समंततो गुप्तित्रयप्रस्स-गुप्तं। असंख्यशुभाव्यवसायसंनद्धदुर्योधृयोधृसहस्र-दुरवलोकम्। सर्वतो निवेशितसद्गुरूपदेशावलिकानिकुरुम्बम्।-व्यव-स्थापितस्थिरतरातिसरलसद्बोधकूपस्तम्भम्। तद्विन्यस्तप्रकृष्टशुभभाव-मयमहासितपटम्। तदग्रसमारूढप्रौढसदुपयोगपञ्जरदौवारिकम्। तदव-द्वाप्रमादनं? गरनिकरसमायुक्तमित्यादि सर्वांगसंपूर्यतया प्रवणं चारित्रमयं महायानपात्रं समर्पयामास। भणितवांश्च भो भो महाभाग समधिरोह त्वमस्मिन् यानपात्रे समारूढश्चात्र। मदीयशिक्षां तु (कु) र्वाणस्त्वमक्षोभेणैव दुस्तरमप्यमुं भवजलाधिपारं यास्यसि निःशेषदुःखातिक्रान्तमनन्तसुखमयं शिवरत्नद्वीपं ततस्तद्वचनेनाश्वासिताहमारूढसूत्रसमर्पितं च मम तेन महापुरुषेण सद्भावनामञ्जूषायां प्रक्षिप्य शुभमनोनामकं महारत्नम्। अभिहतवतां प्रतिरक्षणीयमिदं प्रयत्नतो भद्र। तिष्ठत्यस्मिन्महाप्रभावे शुभमनोरत्ने एतद्यानपात्रं यथोक्तो नियमिकः कूपस्तम्भो यो - पञ्जर-दौवारिकादिकं च सर्वं क्षेमेणावतिष्ठमानमभीष्टदेशं प्राप यथैतदभावे तु सर्वमेतत्प्रलयमुपयाति। अत एव तव पृष्टतः सर्वादारणैव तदपहरणार्थं लगिष्यन्ति ते मोहराजादयो दुष्टतस्करास्तेभ्यश्च त्वयेदमित्थमित्थं च रक्ष-णीयम्। सद्भावनामञ्जूषाङ्गानां चाग्रेतनानां भङ्गं संभावयन् यान्यमू-नीव तदङ्गानि तस्यां नित्यादिशिक्षां प्रयच्छन् मयापि समं दूरदेशं मृत्वा ततोऽन्तर्हितः संजातः श्रुतश्चायं सर्वोऽपि व्यतिकरः प्रमादपरताभि-धानां पल्लीं समाश्रितेन दुष्टतस्कराधिपतिना मोहराजेन। ततो रे रे तस्कराधमा हता वयं २ यतः केनाप्यस्मद्वैरिणा निजयानपात्रमारोप्यास्म-द्विषयभूतं शिवरत्नद्वीपं नेतुमारब्धः शोकसंसारिजीवः स च न केवलं स्वयं चलितं किन्त्वन्यानपि यथा दर्शनमत्मना सहानेकान्तयंस्तिष्ठति। तद्या-वदेतदस्मदीयसंसारनाटकं सर्वशून्यं न करोति। तावद्धावधावदिति ब्रुवाणः ससंभ्रममुत्थाय दुर्बुद्धिनामिकां महानावमारूढः कुवासनाभि-

धाननौवृन्दे विरूढाशेषतस्करनिकरसाहित एव प्रधावितं सत्वरं समागतश्च यानपात्रदेशम् । ततः पूकृतं पञ्जरदौवारिकेण भो भो समायाता एतास्तास्तस्करवेडिकाः प्रगुणीभवत यूयं तत एतच्छ्रुत्वा निर्यामकोत्साहितास्तदुपदिष्टविधिनैव रणमण्डपमारूढाः सज्जीभूताश्चारित्रधर्मनृपतिसैन्ये ---पूर्वोक्तरूपा योद्धाः गृहीतानि सर्वैरपि पञ्जरदौवारिकादिभिर्यथोचितं जीवादितत्वचिन्तनादिरूपाणि नाराचादिप्रहरणानि । मोहराजेनाज्ञापितो मिथ्यादर्शनमन्त्री । उत्साहिताः कषायचरटासूर्जितं हास्यादिषट्कलुण्टाकवृन्दम् । पुरस्कृतः पुरुषवेदादिपरिवृतः काममहा तस्करः व्यापारिता निद्रादयः । प्रतारिताश्च दुर्दर्शनावरणादयः । अग्रेसरीकृतं रोगाद्यसाध्यवेदनीयसैन्यम् । प्रवर्त्तिता जरान्तरायादयः । स्वमपि च निजतनयरागकेसरिद्वेषगजेन्द्रादितलवर्गान्वितेन मोहचरटाधिपेन वेष्टितं समंततोऽनन्तगुणपरिपाद्यायानपात्रम् । प्रहर्तुमारब्धं चाक्षत्रेण सर्वैरेव समकालम् । ततश्च सदागमसेनाधिपोत्साहितेन सम्यग्दर्शनमान्त्रिणा समाक्षिप्तो मिथ्यादर्शनमन्त्री । प्रशममार्दवादिमहायोधैरपि लीलयैव निरुद्धाः । क्रोधादिकषायचरटाः । वैराग्यब्रह्मव्रतादिमहासुभटैरपि दूरमुत्रासितो हास्यादिनिजतलवर्गानुगतः काममहालुण्टाकः । अप्रमादमहारथिनापि श्रुतक्षेपयोगोद्यमादिनोच्चैस्ताडिताः शिरसि निद्रातन्द्रादयः । तदावरणक्षयोपशमवीरेणाप्यधरीकृताश्चक्षुर्दर्शनावर्णादयः । सद्धर्मानुष्ठानोद्दीपितसातोदयसैनिकेनापि विलक्षीकृतं रोगाद्यसातवेदनीयसैन्यम् । पुण्योदयमहाबलवद्राजपुत्रेणापि निःप्रकृता जरान्तरायादयः । एवमन्येषामप्यनन्तानां चारित्रधर्मराजसैनिकानां निजप्रतिपक्षेण सह माहासमरसंमर्दे प्रवृत्ते निजं सैन्यं किञ्चिन्नम्यमानमवलोक्य रे रे तस्कराधमाः किमेतदारब्धं स्थिरीभूय लगत २ सर्वात्मनेति ब्रुवाणो महाचरटचक्रवर्त्ती ससैन्य एवारब्धो युगपत्प्रहर्त्तुं केचित्त्वतीवच्छलघातिनो मोहसैनिकाः । केनापि पक्षेण समारोहन्ति तद्यानपात्रम् । विप्रतारयितुमुपक्रमन्तेमं -- सांतिरणमण्डपस्यान्तः प्रहरन्ति छन्नीभूताः समाहत्य जर्ज्जरयन्ति सद्वासनामञ्जूषाङ्गानि । ततो मया तस्य परमपुरुषस्योपदेशं स्मृत्वा विरचय्य झटिति

निवेशितमावश्यकाटिप्पनकाभिधानं सद्भावनामञ्जूषायां नूतनफलकं ततोऽपरमपि शतकविवरणनामकम् । अन्यदप्यनुयोगद्वारवृत्तिसंस्कृतं ततोऽपरमपि उपदेशमालासूत्राभिधानम् । अपरं तु तद्वृत्तिनामकम् । अन्यज्जीवसमासविवरणनामधेयम् । अन्यत्तु भावनासूत्रसंज्ञितम् । अपरं तु तद्विवरणनामकम् । अन्यत्तु झटिति विरचय्य तस्याः सद्भावनामञ्जूषाया अङ्गभूतं निवेशितं नन्दिटिप्पनकनामधेयं नूतनदृढफलकम् । एतैश्च नूतनफलकैर्निवेशितैर्वज्रमयीव संजाता सद्भावनामञ्जूषा । तेषां पापानामगम्या । ततस्तैरतीव च्छलघातितया संचूर्णयितुमारब्धं तद्द्वारकपाटसंपुटं ततो मया ससंभ्रमेण भिपुणं तत्प्रतिविधानोपायं चिन्तयिताविरचयितुमारब्धं तद्द्वारापिधानहेतोर्विशेषावश्यकविवरणाभिधानं वज्रमयमिव नूतं कपाटसंपुटं ततश्चाभयकुमारगणिधनदेवगणिजिनभद्रगणिलक्ष्मणगणिविबुधचन्द्रादिमुनिवृन्दश्रीमदानन्दश्रीमहत्तरावीरमतिगण्यादिसाहाय्याद्वैरनिश्चितमिदानीं हता वायं यद्येतन्निष्पद्यते ततो धावत धावत गृह्णीत गृह्णीत लगत लगतेत्यादिपूकुर्वतां सर्वात्मशक्तया युगपत्प्रहरतां हा हा रवं कुर्वतां च मोहादिचरटानां चिरात् कथं कथमपि विरचय्य तद्द्वारे निवेशितमेतदिति ततः शिरो हृदयं च हस्ताभ्यां कुदयविशस्तो मोहमहाचरटः समस्तमपि विलक्षीभूतं तत्सैन्यं न निलीनं च सनायकमेव तत्काचित् । ततः क्षेमेण शिवरत्नद्वीपं प्राति गन्तुं प्रवृत्तं तद्यानपात्रमिति ॥

क्व श्रीजिनभद्रगणेः पूज्यस्यैतानि भाष्यवचनानि ।
तर्क्यते व्यतिकरदुर्गाण्यतिगम्भीराणि चलितानि ॥ १ ॥
निवृत्तानि स्वयमेव हि कोट्याचार्यैश्च बुधजनप्रवरैः ।
संगच्छते क्व पुनरपि न मे निवृत्तिः प्रयासोऽत्र ॥ २ ॥

इति श्रीविशेषावश्यकवृत्तिः ॥ २८९७६ । सं. १६७१ माहे सु. ६ माघे. सु.

No. 649. Sudarsanacharitam, by DEVENDRAGANI [सुदर्शन-चरितम्—देवेन्द्रगणिः].

Begins:

ओं नमः । श्रीसुव्रतजिनेन्द्राय ।

वंदितु - - - जिणं सुंदरि सण्णाए पुरं मिलरूयत्थं ।
जह - - लिखाविहारो कराविउ किंपि तह वुत्तं ॥ १ ॥

जहतीइ पढमजम्मे विजयाखयरि इमारित्रमप्पो ।
जह मासंति जिणगिहेपूयं दट्ठुं पुल इयं गा ॥ २ ॥

पत्तासुबो हि बीयं वेयावच्चं चंकाश समणीणं ।
हरि ऊचने उरं बहभरु यत्थे सवलिया जाया ॥ ३ ॥

जहबाण हया नवकारमरण उसिहले - र - - आ ।
उप्पन्ना जाइसराज हनरूय-मिस्सं यत्ता ॥ ४ ॥

अस्सावबोहतित्थे कारीविउ अवत्विया विहारवरं ।
विहियाण अणापत्ता जह-साणे तह कहेमि ॥ ५ ॥

इयं सुयण कमल बोहण रविच्च सुकहां आदि दूदो मेयं ।
अकलं कियानव ससह रूध्व सध्यणमणाणं ॥ ६ ॥

Ends:

इय सुंदरि सण कहाए नवनव संवेग सिरिधरनिहाए ।
मूलादि दूये बंधप्यरूवगोसोलसुद्दोसो ॥ ४४ ॥

सोलम्न इबुद्धे सा अहिगारा हुंति अह अच्छस्स ।
गाहाणं सव्वगां चतुरोसहसा दुवन्नजुथा ॥ ४५ ॥

अहिगारो धणपालो १ सुदंसण २ विजयकुमार ३ सीलमई ४ ।
अस्सावबोह ५ भाया ६ धाईसु ७ धाविइय अद्ध ॥ ४६ ॥

इत्थ यजमिहुस्सुत्तं वुत्तं महतस्स हुक्कडं मित्था ।
पेसि उण परहियरया बहुस्सु यातं विसोहंतु ॥ ४७ ॥

नवनवगमसंगमचंगआगमो जयतु वीरजिणनाहो ॥ ४७ ॥.

जस्स एसायं पावित्रपाणिणो सुहसुहेणमल्लीणासि वपय ।
पासायसिरंसो गौयमगणहरो जयतु ॥ ४८ ॥

तइलोयलोयविफुरियगुरुथकुंदिंकतकित्ति भरा ।
हुत्रासिवायसुहं मप्यहु पमुहगणहरासव्वे ॥ ४९ ॥

चित्तावालयगच्छिकमंडणं जयइ भुवणचंद गुरू ।
तस्सविणे तुग्गाउगुण भवणं देवभद्दसुणी ॥ ५० ॥

तप्पयभत्ता जगचंदसूरिणो ते सिंदुन्निवरसीसा ।
सिरिदेविंदमुणिंदोतहाविजचंदसूरिवरो ॥ ५१ ॥

इयं सुंदरसिणाइकहांनाणतवच्चरणकारणं परमं ।
मूलकहतुफुडच्छा लिहिया देविंदसूरीं हि ॥ ५२ ॥

एस्सत्थाबहुरयणादोगच्छहरा सुचन्नलंकारा ।
सुनिहिव्वकहागसानंद उवि बुहाम्मि यासु इरं ॥ ४०५३ ॥

ग्रंथाग्रंथ ॥ ४५०० ॥

अक्षरमात्रपदस्वरहीनं व्यञ्जनसन्धिविवार्जितेरफं ।
साधुभिरेव मम क्षमितव्यं को न विमुह्यति शास्त्रसमुद्रे ॥

श्रीमद्बृहत्तपागणनाथश्रीसूरसुंदरगुरूणां शिष्योऽशोधयदतिप्रयत्नेन समयमाणिक्यः ॥ १ ॥

श्रीसुधानंदविबुधाधीश्वरश्रीमहीसमुद्रवाचकेन्द्रप्रसादादयमशोधि ॥ संवत् १८४० वर्षे शाके १७०५ प्रवर्त्तमाने मार्गशीर्षवदी० १४सो.

No. 679. Bhagavatyaradhana, by SIVACHARYA, with Panchika [भगवत्याराधनापञ्चिका—मूलसहिता—मू० शिवाचार्यः टी०]

Begins:

ॐ नमः सर्वज्ञाय ॥ दर्शनज्ञानचारित्रतपसामाराधनायाः स्वरूपं प्रतिपादयितुमुद्यतस्यास्य शास्त्रस्य श्रोतॄणां च प्रत्यूहनिराकृतौ यत् क्षमं मङ्गलं तदुपायभूतेयमाराधनादौ सिद्धइत्यादि गाथा ॥ तथा चोक्तम् ।

आदौ मध्येऽवसाने च मङ्गलं भाषितं बुधैः ।
तज्जिनेन्द्रगुणस्तोत्रं तदविघ्नप्रसिद्धये ॥
सिद्धे जयप्पसिद्धे च उव्विहाराण फलं पत्ते ।
वंदित्ता अरहंते वाच्छं आराहणं कमसे ॥
सिद्धान् जगत्प्रसिद्धान् चतुर्विधाराधनफलं प्राप्तान् ।
वन्दित्वा अर्हतः वक्ष्यामि आराधनां क्रमशः ॥

इति पदव्यवस्थितिः । अर्हतो वन्दित्वाऽराधनो वक्ष्यामीति पदसंबन्धः ॥

Ends :

एवं एसा । एवमेषा आराधना सप्रभेदा समासतो निरूपिता । आराधनायामस्यां निबद्धं सर्वमपि भवत्येव श्रुतज्ञानाम् । अद्याजिणणंदि । आचार्यजिननन्दिगणिनः । सर्वगुप्तगणिनः आचार्यमित्रनन्दिनश्च पादमूले सम्यगर्थं श्रुतं चावगम्य । पुव्वा इरि एत्यादि । पूर्वाचार्यकृतानि च शास्त्राण्युपजीव्येयमाराधना स्वशक्त्या शिवाचार्येण रचिता पाणितलभोजिना ॥ छदुमत्थदाण छद्मस्थतया यदत्र प्रवचनाविरुद्धबद्धं भवेत्तत्सुगृहीतार्थाः शोधयन्तु प्रवचनवत्सलतया॥ आराहणा भगवदी । आराधनाभगवती एवं भक्त्या कीर्तिता सती संघस्य शिवाचार्यस्य च विपुलां सकलभव्यजनप्रार्थनीयामव्याबाधमुखां सिद्धिं प्रयच्छतु ॥ इत्याराधनापञ्जिका समाप्ता ॥ ६०३ ॥

कुन्दावदातयशसा सहवासिवंशपद्माकरद्युमणिना गुणिनां वरेण ।
श्रीदेवकीर्त्तिविबुधाय बुधप्रियाय दत्तं यशोधवलनाम धुरंधरेण ॥

श्रीदेवकीर्तिपण्डितच्छात्रेण काहत्याकनाम्ना लिखितमिति ॥ संवत् १४१६ वर्षे चैत्रसुदि पञ्चम्यां सोमवासरे सकलराजशिरोमुकुटमाणिक्यमरीचिपिञ्जरीकृतचरणकमलपादपीठस्य श्रीपेरोजसाहेः सकलसाम्राज्यधुरीविभ्राणस्य समये श्रीदिल्यां श्रीकुन्दकुन्दाचार्यान्वये सरस्वतीगच्छेबलात्कारगणे भट्टारकश्रीरत्नकीर्त्तिदेवपदोदयाद्रितरुणतरुणित्वमूर्व्वीकुर्वाणं भट्टारकश्रीप्रभाचन्द्रदेवतत्सिष्याणां ब्रह्मनाथूनाम् । इत्याराधनापञ्जिकायां ? ग्रन्थ आत्मपठनार्थं लिखापितम् । शुभमस्तु मंगलं महाश्रीः समस्तसंघस्य शुभम् ।

अग्रोतकान्वये साधु. नयपालस्तत्पुत्रकुलधरः । तथा लोहिलगोत्रसाधु. खेतल तथा साधु राजा तस्य पुत्रवीरपाललिखापितम् ॥

No 882. Ratnakarandaka, by SAMANTABHADRA [रत्नकरण्डकन। ।। श्रावकाचारः—समन्तभद्र].

Begins :

नमः श्रीवर्द्धमानाय निर्द्धूतकलिलात्मने ।
सालोकानां त्रिलोकानां यद्विद्या दर्पणायते ॥ १ ॥

Ends :

सुखयतु सुखभूमिः कामिनं कामिनीव
सुतमिव जननी मां शुद्धशीला भुनक्तु ।
कुलमिव गुणभूषा कन्यका संपुनीता
जिनपतिपदपद्मप्रेक्षणी दृष्टिलक्ष्मीः ॥ २१ ॥

इति श्रीसमन्तभद्रस्वामिविरचितोपासकाध्ययने रत्नकरण्डके श्रावकनिलयाधिकारः सप्तमः परिच्छेदः समाप्तः ॥ ७ ॥

APPENDIX II.

List of Manuscripts purchased for Government.

1895-98.

नंबर.	ग्रंथनाम.	कर्ता.	पत्राणि.	पंक्तयः	अक्षराणि.	संवत्.	अपूर्णादिवाच्यम्.
	ब्राह्मणपुस्तकानि.						
	साङ्गोपनिषदो वेदाः						
१	अग्निरहस्यभाष्यम् ...	सायणाचार्यः	५	१४	४५		
२	अतिरात्रप्रयोगः	...	४०	१२	३६	...	अपूर्णः
३	अनुवाकसंख्या	...	१०	६	१६	१८७४	
४	अश्वत्थामविधिः	...	४४	८	२४	श.१७४५	
५	ईशावास्योपनिषद्भाष्यम् ...	महीधरः	११	७	४८	श.१७७५	
६	ऐतरीयब्राह्मणभाष्यम् ... अ० १–५.	सायणाचार्यः	८५	१०	४०	१६५५	प्रथमतः १० प. न.
७	ऐतरेयोपनिषद्विवरणम् ...	शंकराचार्यः	३६	२१	५०		
८	कर्मप्रदीपः	...	३२	९	२८	१४६१	
९	कर्मानुष्ठानपद्धतिः ...	भवदेवः	१७१	६	२०		
१०	काठकोपनिषद्भाष्यम् ...	शंकराचार्यः	३८	८	४०		

११	कात्यायनसूत्रम् ...	..	...	८९	१०	२४	श.१७२२	पूर्वार्द्धमेव.
१२	कात्यायनसूत्रपद्धतिः	...	याज्ञिकदेवः	५८६	१५	२४	१७८८	अध्यायाः—४, ५, ७, ११, १३, १४, १५, १८, २०, २१, २२, २३, २४.
१३	कात्यायनसूत्रपद्धतिः (अग्निष्टोमः)		स एव	१०९	२२	२७		
१४	कात्यायनसूत्रभाष्यम्	...	स एव	९०	११	४०	...	पञ्चमाध्यायस्य.
१५	कालाग्निरुद्रोपनिषद्	...	...	४	१३	३५	श.१७३०	
१६	केनोपनिषद्भाष्यम्	...	शंकराचार्यः	१५	१५	३२		
१७	कैवल्योपनिषद्दीपिका	...	शंकरानन्दः	७	१६	३५		
१८	कौलोपनिषद् ...	...	...	२	८	१६		
१९	गरुडोपनिषद् ...	...	...	३	८	२२		
२०	गारुडोपनिषद् ...	...	...	२	९	३४		
२१	गोपालोत्तरतापनी सटीका	...	टी० विश्वेश्वरः	३०	१०	४८	१७१८	

PURCHASED FOR GOVERNMENT.

नंबर.	ग्रंथनाम.	कर्ता.	पत्राणि.	पंक्तयः	अक्षराणि.	संवत्.	अपूर्णादिवाच्यम्.
२२	छान्दोग्योपनिषद्भाष्यम् ...	शंकराचार्यः	१३०	१२	४०	१८०५	
२३	जाबालोपनिषद्	...	७	८	१६	१८५९	
२४	तैत्तिरीयोपनिषद्	...	९	१३	३२		
२५	तैत्तिरीयोपनिषद्भाष्याविवरणम्	शंकराचार्यः	३२	१२	५०	...	पत्रे १-२ न.
२६	त्रिकालसन्ध्या	...	८	९	३२		
२७	द्विपञ्चाशदुपनिषदः ...	...	९६	१२	३६	१८७७	
२८	निरुक्तव्याख्या—उत्तरार्धम्	...	१८	१३	२५	...	अपूर्णम्.
२९	नेत्रोपनिषद्	....	१	११	४४		
३०	पवमानः	...	२६	१०	३२	१६३४	
३१	पारस्करीयगृह्यसूत्रभाष्यम् ...	हरिहरः	१९६	६	४४	...	अपूर्णम्.
३२	पुरुषसूक्तव्याख्या ...	...	५	९	३०		
३३	बृहदारण्यकभाष्यम् ...	आनन्दतीर्थः	७७	९	४०	१६६३	
३४	बृहदारण्यकभाष्यवार्त्तिकम् ..	सुरेश्वराचार्यः	२९१	१०	३२	१४४८	अपूर्णम्.

३५	बृहन्नारायणोपनिषद् ...	...	२०	११	३२		
३६	मन्त्रभाष्यम्	मुरारिमिश्रः	६१	१३	३२	...	त्रुटितम्.
३७	मुण्डकोपनिषद्विवरणम् ...	शंकराचार्यः	१९	१६	३६	...	प्रथमपत्रं न.
३८	यजुर्वेदसंहितानुवाकः ...	...	६	७	३४	श.१७३५	
३९	रामोपनिषद्	...	५	८	२७	!	
४०	रुद्रसूक्तस्य भाष्यम् ...	नरहरिसूनुःसोमराजः	२२	१४	४१	१७२३	
४१	वज्रसूच्युपनिषद्	शंकराचार्यः	४	१२	४०		
४२	वाजसनेय्युपनिषद् ...	...	१४६	६	२१	१७३१	
४३	विष्णुसूक्तम्	..	४	९	३२		
४४	शिक्षा वाजसनेयी ...	याज्ञवल्क्यः	१०	६	२६	श.१७३४	
४५	शिक्षा	पाणिनिः	६	७	३२	श.१७३४	
४६	शिक्षोपनिषद्	...	८	९	१५		
४७	श्रीसूक्तं सटीकं तत्प्रयोगश्च ...	टी० वैद्यनाथः	१८	१२	४५		
४८	श्रीसूक्तपद्धतिः	...	२५	१०	४८		
४९	सन्ध्या भाष्यसहिता ...	भा० नारायणदासः	२६	८	३२	१९११	

PURCHASED FOR GOVERNMENT.

नंबर.	ग्रंथनाम.	कर्ता.	पत्राणि.	पंक्तयः	अक्षराणि.	संवत्.	अपूर्णादिवाच्यम्.
५०	सर्वानुक्रमणिका	...	४८	८	२६	१७२८	
५१	सर्वानुक्रमणिका व्याख्या ...	याज्ञिकदेवः	१२१	१०	३५	...	अध्यायः २, ३, ४.
५२	सूर्योपनिषद्	...	४	६	२६		
	धर्मशास्त्रम्.						
५३	अन्त्येष्टिक्रियापद्धतिः ...	...	७१	१०	३२	श.१७२०	
५४	आर्चिरादिमार्गवैभवः ..	..	७	१३	४८		
	(रामानुजमतस्य)						
५५	आचारदर्पणः	श्रीदत्तः	७४	११	३२	...	पत्राणि ४२, ६१, ७१ न.
५६	आचारदीपकः	नागदेवः	१३२	९	४०	१६८०	
५७	आचारार्कः	दिवाकरः	९८	८	२६		
५८	आशौचत्रिंशच्छ्लोकीभाष्यम्	...	२१	११	३२	१८०२	
५९	आशौचषोडशी	आदित्यभट्टः	६	१०	३२		
६०	आह्निकम्	...	७	१५	४०	१७०६	

६१	आह्निकाचारतत्वम् ...	रघुनन्दनभट्टाचार्यः	९१	११	४०		
६२	उत्सवविधिः ... ... (त्रिविधलीलावलिश्च)	घनश्यामजी.	१७६	९	१८		
६३	उपनयनपद्धतिः	...	१२	९	३६	१६९८	
६४	ऋग्विधानम्	...	३१	९	२६	!	
६५	कर्मविपाकः ... ... (ब्रह्मनारदसंवादरूपः)	...	२७	१२	४०	...	अध्याय १-१२.
६६	कालनिर्णयदीपिका–सटीका	मू० रामचन्द्राचार्यः टी० नृसिंहाचार्यः	९२	१२	४८		
६७	कालमाधवकारिका ...	...	१२	९	२८	श.१६८५	
६८	कृत्यरत्नाकरः	लोकनाथः	२५	१६	३८	...	अपूर्णः
६९	कृष्णपद्धतिः	चतुर्भुजाचार्यः	११	१५	३२	...	अपूर्णा.
७०	गोत्रप्रवरोच्चारः–उदिच्यप्रकाशस्य.	...	४	८	२२		
७१	ग्रहमखः	...	२५	१०	२७	श.१७२१	
७२	चातुर्मास्यपद्धतिः... ...	वैजनाथमिश्रः	२२	१०	४०	१७९७	

PURCHASED FOR GOVERNMENT.

नंबर.	ग्रंथनाम.	कर्ता.	पत्राणि.	पंक्तयः	अक्षराणि.	संवत्.	अपूर्णादिवाच्यम्.
७३	जयसिंहकल्पद्रुमः ...	रत्नाकरः	६०८	१४	४०	१८५९	
७४	जलाशयोत्सर्गप्रयोगः ...	कमलाकरः	१३	१३	३२	१८०७	
७५	तिथिनिर्णयः	राघवः	१२	११	४८	श १६९९	
७६	तिलकमुद्राधारणविधिः ...	...	६	७	१६		
७७	तुलादानप्रयोगः . ..	कमलाकरः	११	७	२१		
७८	तृचाकल्पनमस्कारः ...	...	७	१५	२८	श.१७३४	
७९	त्र्यम्बकीयाशौचनिर्णयः ...	त्र्यम्बकपण्डितः	१९	७	२१		
८०	दण्डकशान्तिः	...	२९	६	२४	१९१८	
८१	दर्शपौर्णमासपद्धतिः ...	गणपतिः	३१	१२	२६	१८२[illegible]	प्र. पत्रं न.
८२	दानदिनकरोद्योतः ...	विश्वेश्वरः	२६१	२०	४४		
८३	दानविवेकः	भानुदीक्षितः	२२	१७	४२	१८६६	
८४	दायभागनिर्णयः	भट्टोजिदीक्षितः	६	९	२४		
८५	दैवज्ञवल्लभः	श्रीपतिः	४०	१२	२४	...	अपूर्णः

८६	नारायणसारसंग्रहः ...	...	२८	१०	२२	
८७	निर्णयपञ्चकम् ...	...	१९	१०	२६	
८८	निर्णयभास्करः ...	...	२०	८	४८	१७२५
८९	निर्णयासिन्धुः ...	कमलाकरः	२५७	१०	४८	श॰१७३६
